बौधायन विवाह मन्त्राः

१.१.१५. अनृक्षरा ऋजवस्सन्तु पन्था येभिस्सखायो यन्ति नो वरेयम् ।
समर्यमा सम्भगो नो निनीयात्सञ्जास्पत्यँ सुयममस्तु देवाः ॥

१.१.१७. प्रजापतिः स्त्रियां यशः । मुष्कयोरदधात्सपम् । कामस्य तृप्तिमानन्दम् । तस्याग्ने भाजयेह मा । मोदः प्रमोद आनन्दः । मुष्कयोर्निहितः सपः । सृत्वेव कामस्य तृप्याणि । दक्षिणानां पतिग्रहे । मनसश्चित्तमाकूतिम् । वाचः सत्यमशीमहि । पशूनाँ रूपमन्नस्य । यशः श्रीः श्रयतां मयि । यथाऽहमस्या अतृपँ स्त्रियै मयि । यथा स्त्री तृप्यति पुँसि प्रिये प्रिया । एवं भगस्य तृप्याणि । यज्ञस्य काम्यः प्रियः । ददामीत्यग्निर्वदति । तथेति वायुराह तत् । हन्तेति सत्यं चन्द्रमाः । आदित्यः सत्यमोमिति । आपस्तत्सत्यमाभरन् । यशो यज्ञस्य दक्षिणाम् । असौ मे कामः समृध्यताम् ॥ (तै.ब्रा.-२.४.५,६,७)

१.१.२४. अभ्रातृघ्नीं वरुणापतिघ्नीं बृहस्पते ।
इन्द्रापुत्रघ्नीं लक्ष्म्यं तामस्यै सवितस्सुव ॥

१.१.२५. अघोरचक्षुरपतिघ्न्येधि शिवा पतिभ्यऽस्सुमनास्सुवर्चाः ।
जीवसूर्देवकामा शं नो भव द्विपदे शं चतुष्पदे ॥

१.१.२६. इदमहं या त्वयि पतिघ्न्यलक्ष्मिस्तां निर्दिशामि ॥

१.१.२८. एकमिषे विष्णुस्त्वाऽन्वेतु । द्वे ऊर्जे विष्णुस्त्वाऽन्वेतु । त्रीणि व्रताय विष्णुस्त्वाऽन्वेतु । चत्वारि मायोभवाय विष्णुस्त्वाऽन्वेतु । पञ्च पशुभ्यो विष्णुस्त्वाऽन्वेतु । षड्रायस्पोषाय विष्णुस्त्वाऽन्वेतु । सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वाऽन्वेतु ॥

१.१.२९. सखायस्सप्तपदा अभुम सव्यं ते गमेयं सख्यात मा योषं मा योष्ठाः ॥

१.२.२०. आपः पादावनेजनीर्द्विषन्तं नाशयन्तु मे ॥ अस्मिन् कुले ब्रह्मवर्चस्यानि ॥

१.२.२४. मयि महो मयि भगो मयि भर्गो मयि यशः ॥

१.२.२७. आम आगाद्वर्चसा यशसा संसृज पयसा तेजसा च ।
तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनाम् ॥

१.२.२८. विराजोऽसि विराजो दोहमशीय । मम पद्याय विराज ॥

१.२.२९. समुद्रं वः प्रहिणोम्यक्षिताः स्वां योनिमपि गच्छत ।
अच्छिद्रः प्रजया भूयासं मा परासोचि मत्पयः ॥

१.२.३१. अमृतोपस्तरणमसि ॥
१.२.३४. त्रय्यै विद्यायै यशोऽसि यशसो यशोऽसि ब्रह्मणो दीप्तिरसि ।
तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनाम् ॥
१.२.३५. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि ॥
१.२.३६. नेष्टावृद्धिं कृन्तामि या ते घोरा तनूः।
तया तमाविश योस्मान् द्वेष्टि यं च वयं द्विष्मः ॥
१.२.३७. यन्मधुनो मधव्यं परममनाद्यं वीर्यम् ।
तेनाहं मधुनो मधव्येन परमेणात्राद्येन वीर्येण परमोऽन्नादो मधुव्योऽसानि ॥
१.२.४४. गौरस्यपहतपाप्माऽप पाप्मानं नुद मम चामुष्य च ॥
१.२.४८. अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः ।
शिवा अस्मभ्यमोपधीः कृणोतु विश्वचर्षणिः ॥
१.२.४९. अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः।
अरिष्टमस्माकं कृणोत्वसौ ब्राह्मणो ब्राह्मणेषु ॥
१.२.५०. गौर्धेनुभव्या माता रुद्राणां दुहिता वसूनां स्वसाऽऽदित्यानाममृतस्य नाभिः ।
प्रणुवोचं चिकितृषे जनाय मा गामनागामदितिं वधिष्ट । पिबतूदकं तृणान्यत्तु ।
ओमुत्सृजत ॥
१.२.५७. भूतं सुभूतं सा विराट् तन्मा क्षायि तन्मेऽशीय तन्म ऊर्जं धा ओं कल्पयत ॥
१.२.६०. विराडसि विराडन्नं विराड्विराजो मयि धेहि ॥
१.४.१. मम हृदये हृदयं ते अस्तु मम चित्ते चित्तमस्तु ते ।
मम वाचकमेकमनाः शृणु मामेवानुव्रता सहचर्या मया भव ॥
१.४.३. मां ते मनः प्रविशतु मां चक्षुर्मामु ते भगः मयि सर्वाणि भूतानि मयि प्रज्ञानमस्तु
त ॥
१.४.४. मधुगो मध्वगाहे जिह्वा मे मधुवादिनी ।
मुखे मे सारघं मधु दत्सु संवननं कृतम् ॥
१.४.५. चाक्रवाकं संवननं यन्नदीभ्य उदाहृतम् ।
यद्वित्तौ देवगान्धर्वौ तेन संविननौ स्वः ॥
१.४.६. स्पृशामि तेऽहमङ्गानि वायुरापश्च मा परः ।
मां चैव पश्य सूर्यं च मा चान्येषु मनः कृथाः ॥
१.४.७. सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।

तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥
१.४.८. सोमोऽददद्गन्धर्वाय गन्धर्वोऽदददग्नये ।
रयिं च पुत्रांश्चा दादग्निर्मह्यमथो इमाम् ॥
१.४.९. सरस्वति प्रेदमव सुभगे वाजिनीविति ।
तां त्वा विश्वस्य भूतस्य प्रगायामस्यग्रतः ॥
१.४.१०. गृभ्णामि ते सुप्रजस्त्वाय हस्तं मया पत्या जरदिष्टिर्यथाऽसः ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः ॥
१.४.११. परित्वाऽग्ने पुरं वयं विप्रं सहस्य धीमहि ।
धृषद्वर्णं दिवोदिवे भेत्तारं भङ्गुरावतः ॥
१.४.१३. अग्ने शर्ध महते सौभागाय तव द्युम्नान्युत्तमानि सन्तु ।
सञ्जास्पत्यं सुयममाकृणष्व शत्रूयताभितिष्ठा महांसि ॥
१.४.१४. सोमाय जनिविदे स्वाहा ॥
१.४.१५. गन्धर्वाय जनिविदे स्वाहा ॥
१.४.१६. अग्नये जनिविदे स्वाहा ॥
१.४.१७. कन्यला पितृभ्यो यती पतिलोकमव दक्षिणमदास्थ स्वाहा ॥
१.४.१८. प्रेतो मुञ्चाति नामुतस्सुबद्धाममुतस्करत् ।
यथेयमिन्द्रमीढ्वस्सुपुत्रा सुभगा सती ॥
१.४.१९. इमां त्वमिन्द्र मीढ्वस्सुपुत्रां सुभगां कुरु ।
दशाभ्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥
१.४.२०. अग्निरैतु प्रथमो देवतानां सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् ।
तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् ॥
१.४.२१. इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घामायुः ।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमयि प्रबुध्यतामियम् ॥
१.४.२२. मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यस्संविशन्तु ।
मा त्वं विकेश्युर अवधिष्टा जीवपत्नी पतिलोके विराज पश्यन्ती प्रजां
सुमनस्यमानाम् ॥
१.४.२३. अप्रजस्तां पौत्रमृत्यं पाप्मानमुत वाऽघम् ।
शीर्ष्णस्स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशम् ॥
१.४.२४. आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव ।

अभितिष्ठ पृतन्यतस्सहस्व पृतनायतः ॥
१.४.२६. इयं नार्युपब्रूतेऽग्नौ लाजानावपन्ती ।
दीर्घायुरस्तु मे पतिर्जीवातु शरदश्शतम् ॥
१.४.२७. तुभ्यमग्रे पर्यवहन् सूर्याम् वहतुना सह ।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥
१.४.२९. पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।
दीर्घायुरस्या यः पतिस्स एतु शरदशतम् ॥
१.४.३१. विश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विषः ॥
१.४.३३. प्रजापते न त्ववेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥
१.४.३४. यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् ।
अग्निस्तत्स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु मे ।
अग्नये स्विष्टकृते सुहुतहुत आहुतीनां कामानां समर्धयित्रे ॥
१.५.३. ये वध्वश्चन्द्र वहतुं यक्ष्मा यन्ति जनाँ अनु ।
पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ॥
१.५.४. पूषा त्वेतो नयतु हस्तगृह्याश्विनौ त्वा प्रवहतां रथेन ।
गृहान् गच्छ गृहपत्नी यथाऽसो वशिनी त्वं विदथमावदासि ॥
१.५.५. सु गं पन्थानमारुक्षमरिष्टं स्वस्तिवाहनम् ।
यस्मिन् वीरो न रिष्यत्यन्येषां विन्दते वसु ॥
१.५.६. या ओषधयो या वनस्पतयो या नद्यो यानि धन्वानि ये वना ।
ते त्वा वधु प्रजावतीं प्रत्वे मुञ्चन्त्वंहसः ॥
१.५.७. भद्रान् गृहान् सुमनसः प्रपद्येऽवीरघ्नी वीरवतस्सुवीरान् ।
इरां वहतो घृतमुक्षमाणास्तेष्वहं सुमनास्संविशानि ॥
१.५.८. इह गावः प्रजायध्वमिहाश्वा इह पुरुषाः ।
इहो सहस्रदक्षिणो रायप्सोषो निषीदत ॥
१.५.११. नीललोहिते भवतः कृत्या सक्तिर्व्यज्यते ।
एधन्तेऽस्या ज्ञातयः पतिर्बन्धेषु वध्यताम् ॥
१.५.१३. ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवमसि ध्रुवतस्स्थितम् ।
त्वं नक्षत्राणां मेथ्यसि स मा पाहि पृतन्यतः ॥

१.५.१४. सप्त ऋषयः प्रथमां कृत्तिकानामरुन्धतीं यद्ध्रुवतां ह नित्युः ।
षट्कृत्तिका मुख्ययोगं वहन्तीयमस्माकमेधत्वष्टम्यरुन्धती ॥
१.५.१५. अग्ने व्रतपते उपयमनं व्रतं चरिष्यामि तच्छकेयम् तन्मे राध्यताम् ।
वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते उपयमनं व्रतं चरिष्यामि तन्मे राध्यानाम् ॥
१.५.१८. ऊर्जः पृथिव्या अध्युत्थितोऽसि वनस्पते शतवल्शो विरोह ।
त्वया वयमिषमूर्जं वदन्तो रायस्पोषेण समिषा मदेम ॥
१.५.१९. प्रजया त्वा संसृजामि मासरेण सुरामिव ॥
१.५.२०. प्रजावती भूयासम ॥
१.५.२१. प्रजया त्वा पशुभिस्संसृजामि मासरेण सुरामिव ॥
१.५.२२. प्रजावान् पशुमान् भूयासम् ॥
१.५.३०. सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यामस्यै दत्वायाथास्तं विपरेतन ॥
१.५.३१. सं ना मनस्सं हृदयानि सं नाऽभि सं तनुत्यजः ।
सं त्वा कामस्य याक्त्रेणे युञ्जत्यविमोचनाय ॥
१.६.१०. यस्त्वा हृदा कीरिणा मन्यमानो मत्यं मर्त्यो जोहवीमि ।
जातवेदा यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥
यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् ।
अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति ॥
१.६.१२. अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः पापी लक्ष्मिस्तामस्या अपजहि ॥
१.६.१३. वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः पतिघ्नी तनूस्तामस्या अपजहि ॥
१.६.१४. आदित्ये प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः अपुत्र्या तनूस्तामस्या अपजहि ॥
१.६.१५. प्रजापते प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः अपशव्या तनूस्तमस्या अपजहि ॥
१.६.२१. अर्यम्णो अग्निं परियन्तु क्षिप्रं प्रतिक्षन्तां श्वश्रुवो देवराश्च ॥
१.६.२३.उदीर्ष्वातो विश्ववसो नमसेडामहे त्वा । अन्यामिच्छ प्रफर्व्यं सं जायां पत्या सृज ।

उदीर्ष्वातः पतिवती ह्येषा विश्वावंसु नमसा गीर्भिरी। अन्यामिच्छ पितृपदं व्यक्तां
स ते भागो जनुषा तस्य विद्धि ॥
१.६.२४. प्रजापतिः स्त्रियां यशः । मुष्कयोरदधात्सपम् । कामस्य तृप्तिमानन्दम् ।
तस्याग्ने भाजयेह मा । मोदः प्रमोद आनन्दः । मुष्कयोर्निहितः सपः । सृत्वेव
कामस्य तृप्याणि । दक्षिणानां पतिग्रहे । मनसश्चित्तमाकूतिम् । वाचः
सत्यमशीमहि । पशूनाँ रूपमन्नस्य । यशः श्रीः श्रयतां मयि । यथाऽहमस्या
अत्रुपँ स्त्रियै मयि । यथा स्त्री तृप्यति पुँसि प्रिये प्रिया । एवं भगस्य तृप्याणि ।
यज्ञस्य काम्यः प्रियः । ददामीत्यग्निर्वदति । तथेति वायुराह तत् । हन्तेति सत्यं
चन्द्रमाः । आदित्यः सत्यमोमिति । आपस्तत्सत्यमाभरन् । यशो यज्ञस्य
दक्षिणाम् । असौ मे कामः समृध्यताम् ॥
१.६.२६. जीवां रुदन्ती विमयन्तो अध्वरे दीर्घामनुप्रसिति दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥
१.७.३७. विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥
१.७.३८. यथाऽग्निगर्भा पृथिवी द्योर्यथेन्द्रेण गर्भिणी ।
वायुर्यथा दिशां गर्भ एवं गर्भं दधातु ते ॥
१.७.३९. गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥
१.७.४०. हिरण्ययी अरुणी यं निर्मन्थतो अश्विना ।
तंते गर्भं दधाम्यहं दशमे मासि सूतवे ॥
१.७.४१. नेजमेष परापत सपुत्रः पुनरापत ।
अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान् ॥
१.७.४२. अमूहमस्मि सा त्वं द्योरहं पृथिवी त्वं रेतोऽहं रेतोभृत्त्वं मनोऽहमस्मि वाक्त्वं
सामाहमस्मि ऋक्त्वं तावेहि सम्भवाव सह रेतो दधावहै पुंसे पुत्राय वेत्तवै
रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥
१.७.४३. अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वन्तः ।
अहं प्रजा अजनयन्पितृणामहं जनिभ्यो अपरिषु पुत्रान् ॥
१.७.४४. तां पूषच्छिवतमोमरयस्व यस्यां बीजं मनुष्या वपन्ती ।
या न ऊरू उशती विस्रयातै यस्यामुशन्तः प्रहरेम शेफम् ॥

१.८.१. यथा त्वं वनस्पत ऊर्जा अभ्युत्थितो वनस्पते ।

शतवल्शो विरोहस्येवमहं पुत्रैश्च पशुभिश्च सहस्रवल्शा वि वयं रुहेम ॥

१.८.३. यथा त्वं वनस्पते फलवानस्येवमहं पुत्रैश्च पशुभिश्च फलवान् भवानि ॥

१.८.५. ऊर्जस्वान् पयस्वान् पयसा पिन्वमानोऽस्मान् वनस्पते पयसाऽभ्याववृत्स्व ॥

१.८.१०. प्रतियुतो वरुणस्य पाशः प्रत्यस्तो वरुणस्य पाशः ॥